শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

॥ শ্রী নরনীতকৃষ্ণাষ্টকম্ ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

শ্রী রঙ্গরামানুজ মহাদেশিকন্

His Holiness śrīmad āṇḍavan śrīraṅgam

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

॥ শ্রী নৱনীতকৃষ্ণাষ্টকম্ ॥

মন্দস্মিতং মধুরকোমললাস্যলীলং
কন্দর্পকোটিকমনীযকিশোরমূর্তিম্।
কুন্দস্ফুরদ্দশনকং কুটিলালকান্তং
ৱন্দেয নন্দতনযং নৱনীতকৃষ্ণম্॥ **1** ॥

নাট্যাৱলোকনকুতূহলিভিঃ প্রদিষ্টং
কোট্যা করস্য নৱনীতঘনং দধানম্।
শাট্যা শিশোরুচিতযা শবলাৱলম্বং
ৱীট্যা লসন্মুখমিমো নৱনীতকৃষ্ণম্॥ **2** ॥

মঞ্জীরমঞ্জুচরণং মৃদুলাঙ্গুলীকং
পুঞ্জীভৱন্মধুপপুষ্কলপুষ্পমালম্।
কঞ্জীভৱন্নযনমাশ্রিতদেহভাজাং
সঞ্জীৱনং নম মনো নৱনীতকৃষ্ণম্॥ **3** ॥

পূরেণ নীলমহসাং পরিপূর্ণগাত্রং
হারেণ মৌক্তিকজুষা হৃতসর্ৱচিত্তম্।
চোরেণ মোহিতমুনিং দধিকুণ্ডভাজা
পারেগিরং স্তুহি মনো নৱনীতকৃষ্ণম্॥ **4** ॥

পদ্মালযাধরণিপালিতপার্শ্বযুগ্মং
সদ্মাস্থিতং মণিকনৎকনকাৱকুপ্তম্।
ছদ্মাদিদূরগজনৈঃ পরিচর্যমাণং
ৱিদ্মঃ কথং ৱযমমুং নৱনীতকৃষ্ণম্॥ **5** ॥

ধ্যাতং সদা মুনিজনৈরভিবৃদ্ধহর্ষৈঃ
পূতং মুহুর্ব্রজরধূজনচুম্বিতৈস্তৈঃ।
ক্রীতং ক্ষণেন শরণাগতদীনৱাচা
স্ফীতং শ্রিযা ভজ মনো নৱনীতকৃষ্ণম্॥ **6**॥

উদ্যন্মৃগাঙ্ককমনীযমুখারৱিন্দং
সদ্যঃস্ফুরৎকমলকোমললোচনান্তম্।
যদ্যন্নতাভিলষিতং তদুপার্জযন্ত -
মদ্য স্মরামি সরসং নৱনীতকৃষ্ণম্॥ **7**॥

তুঙ্গং গুণৈরনুপমৈরনৱদ্যগন্ধৈঃ
সঙ্গং শ্রিতেষু সততং স্বযমাদধানম্।
অঙ্গং ৱহন্তমতুলং নৱমেঘনীলং
ৎৱং গন্তুমর্হসি মনো নৱনীতকৃষ্ণম্॥ **8**॥

নৱনীতকৃষ্ণৱিষযামৱনীসুরভাৱুকাং স্তুতিং কথযন্।
সৱনী সংপন্নঃ স্যাৎ স ৱনী স যতিঃ স এৱ মুক্তশ্চ॥ **9**॥

॥ শ্রী নৱনীতকৃষ্ণাষ্টকং সমাপ্তম্॥